© 2017 IJSRST | Volume 3 | Issue 3 | Print ISSN: 2395-6011 | Online ISSN: 2395-602X
DOI : https://doi.org/10.32628/IJSRST

# मूल्यशिक्षाविकासे अध्यापकस्य योगदानम्

प्रो. रजनीकान्तशुक्ल:
शिक्षासङ्काय:, राष्ट्रियसंस्कृतविद्यापीठम् (मानितविश्वविद्यालय:) तिरुपति:

मानवा: एव मूल्यशिक्षाया: आधारभूता: भवन्ति । अत: मानवेषु अन्तर्निहितशक्तीनां विकास: शिक्षयैव भवितुमर्हति । सा शिक्षा कीदृशी भवेदिति प्रश्ने सति आधारत्वेन माता-पिता- आचार्या: कनिष्ठिकाधिष्ठिता: भवन्ति । बालकानां जीवने एते त्रय: मूल्यानां विकासे आधारपुरुषत्वेन कार्यं सम्पादयन्ति । मानवीयगुणानां प्राप्तये निरन्तरं सक्रिया: अभिभावका: आचार्या: चैव प्रेरका: भूत्वा स्वव्यक्तित्वेन, आचरणेन अनुभवेन च मूल्यशिक्षाविकासे रता: परिदृश्यन्ते।

या शिक्षा मूल्येन बालकान् योजयति, सा एव मूल्यशिक्षा इत्यभिधीयते कस्य बालकस्य कृते कतिमूल्यानि अपेक्षितानीति निश्चेतुं न शक्यते । यथा-नैतिक-धार्मिक-सौन्दर्यात्मक-अध्यात्मिक-राष्ट्रिय- अन्तर्राष्ट्रियमूल्यानि । इमान्येव मूल्यानि सर्वेषां मानवानां कृते आवश्यकानि सन्ति उपर्युक्तमूल्यानां विकासे अध्यापकै: निरन्तरं विभिन्नानामुपकरणानां साहाय्येन सम्पाद्यते **शैशवेऽभ्यस्त विद्यानां**...... इति महाकविकालिदासवचनानुसारेण सर्वासु विद्यासु अभ्यास: शैशवावस्थात: प्रारम्भणीय: किमर्थमिति प्रश्ने सति मानवविकासस्याधार: शैशवावस्थैवेति ।

मनोवैज्ञानिकसिद्धान्तानुसारेण बाल्यावस्थायां ग्रहणशक्ति: बालकानामधिकेति प्रतिपाद्यते तदवस्थायामेव रुचि:, कल्पना, तर्क:, आत्मविश्वासेत्यादिगुणानां विकास: जायते । येन एवं बाल: परिपक्वो भूत्वैव सर्वशक्तियुक्तो भवति । मूल्यानां संरक्षणार्थं विकासार्थं च भगवत: श्रीकृष्णस्योपदेश: श्रीमद्भगवद्गीतायां प्रतिपादित: । सत्यं वद, धर्मं चर, स्वाध्यायप्रवचनाभ्यां मा प्रमदितव्यमित्यादीनि बहूनि मूल्यानि संस्कृतवाङ्मयेषु उपदिष्टानि वर्तन्ते । यानि मूल्यानि विविधेषु संस्कृतसाहित्यादिग्रन्थेषु उपलभ्यन्ते। येषां व्याख्यानानामुपदेश: समये समये हितोपदेशकथादिग्रन्थेषु सरलभाषया समुल्लिखित:।

अध्यापनकाले अध्यापका: विविधानि उदाहरणानि सम्प्रदर्श्य कक्षायां सुष्ठुरीत्या अध्यापयन्ति । "अधीतिबोधाचरणप्रचारणमिति" या ज्ञानप्रक्रिया विद्यते तत्रैव प्रसारोऽपि अन्तर्निहितो भवति । मूल्यानां संरक्षणे संवर्धनेच आचार्याणां ऋषीणां च यदुपदेश: विद्यमानो वर्तते तदुपयोगित्वमवश्यं कार्यमिति भाव:।

अस्मिन् विषये ये दार्शनिका: शिक्षाशास्त्रिण: च सन्ति, ते निरन्तरं मूल्यानां संरक्षणाय कार्यं कुर्वन्त: सन्ति । तदाधारेणैव अध्यापकप्रशिक्षणकार्यक्रमे विविधानि मूल्यानि प्रतिस्तरे निर्धारितानि सन्ति, येनाधारेण देशे विद्यमाना: प्रशिक्षणसंस्था: प्रतिवर्षं प्रशिक्षकाणां कृते मूल्यशिक्षाप्रशिक्षणं प्रददति परन्तु वर्तमाने भौतिकुयगे मूल्यशिक्षाप्रशिक्षाविकासार्थमध्यापकानां कृते केचन क्लेशा: परिदृश्यमाना: सन्ति। औपचारिकमाध्यमेन या शिक्षाप्राप्तिपरम्परा प्रचल्यमाना वर्तते, तत्र विज्ञानप्रविध्यो: कारणेनैव परिवर्तनानि समागतानि सन्ति। साम्प्रतम् अध्यापक: पाठनेन साकं विभिन्नेषु यन्त्रेषु दक्षतां सम्पादयति एवञ्च तदुत्तम: भवितुमभिलषति।

**Copyright © The Author(s):** This is an open-access article distributed under the terms of the Creative Commons Attribution **4.0 International License (CC BY-NC 4.0)** which permits unrestricted use, distribution, and reproduction in any medium for non-commercial use provided the original author and source are credited.

"शिलष्टाक्रिया कस्यचिदात्मसंस्था, संक्रान्तिरन्यस्य विशेषयुक्ता" इति अनेन कालिदासवचनाधारेण अध्यापकस्य कृते स्वव्यक्तित्वे, परिवर्तनयुगानुसारेण विचारे, व्यवहारे, प्रविधिज्ञाने, चालने, पाठने परिवर्तनविषये च चिन्तनमपेक्षितम्। केवलं चाकोवाकविधि: इत्यस्य स्थाने यन्त्रोवाक् विज्ञानवाक् वा इति स्वीकरणीयमस्ति । पूर्वं"क्रियासिद्धिस्सत्वे भवति महतां नोपकरणे" इति या प्रसिद्धा पङ्क्ति: आसीत्, तस्यां क्रियासिद्धि: सत्त्वे भवति महतां चोपकरणे इति साम्प्रतमङ्गीकर्तव्यमेव अत: उपकरणसाहाय्येन यानि मूल्यानि शास्त्रेषु संस्कृतवाङ्मयेषु उपदिष्ठानि तान्येव मूल्यानि प्रसारणीयानि प्रचारणीयानि च ।

अध्यापक शिक्षापाठ्यक्रमे केवलं पाश्चात्यसिद्धान्तानाधारीकृत्य पाठनापेक्षया तत्स्थाने भारतीयमूल्यानि यानि सन्ति तेषां सिद्धान्तानां प्रवर्तकानां च पाठ्यक्रमे समावेश: करणीय:। यावत् वयं भारतीय संस्कृतिसभ्यतामाधारीकृत्य मूल्यानि पाठ्यक्रमे नैव स्थापयाम: तावत् भारतीयपरिवेशे पाश्चात्यसिद्धान्ताधारिताम् इमां मैकालेशिक्षाव्यवस्थामेवानुसराम:। अत: साम्प्रतं य: काल: प्रचल्यमानो अस्ति, तस्मिन्नेव मूल्यानां विकासार्थं जीवनयापनार्थं च आचार्या: अध्यापका: समर्था: सन्ति: । येषां मूल्यानां ह्रास: जायते तेषां मूल्यानां संरक्षणाय प्रयत्न: करणीय:। नैतिक- धार्मिक- आध्यात्मिकादिमूल्यानामावश्यकता अनिवार्यतया बालकानां कृते विद्यते। वर्तमानवातावरणे तानि मूल्यानि विद्यालयपरिसरे कथं दातव्यानि एतस्योत्तरदायित्वं शिक्षकाणामुपरि न्यस्तं वर्तते । शिक्षकंविना शिक्षाया: पूर्ति: नैव भवितुमर्हति । तस्मात् हिन्दीभाषायां एषा प्रसिद्धा पङ्क्ति: उद्धृता यथा "गुरुविना होइ न ज्ञान" इति डगल्सप्रतिवेदने इति सत्यं प्रतिपादितं यत् " विश्वं सर्वं एकस्मिन् कक्षाकक्षे विद्यते इति"। अत: बालकानां सर्वाङ्गीणविकासाधारो भवति शिक्षक:। तैत्तरीयोपनिषदि "आचार्य: पूर्वरूपम्, अन्तेवासी उत्तररूपम्, विद्या सन्धि:, प्रवचनम् सन्धानम्" इति या ज्ञानप्रक्रिया वर्णिता, सा एव मूल्यानां विकासे सहायिका अनिवार्या च भवति चेत्- धर्मार्थकामादिपुरुषार्थचतुष्टयप्राप्तये मूल्यानि ज्ञातव्यान्यैव।

सन्तुलिततव्यक्तित्वविकासाधारो भवति पुरुषार्थचतुष्टयम् धर्मेण अर्थ:, धर्मे काम:, धर्मेण मोक्ष: इत्ययं क्रम: अनुसरणीय:। धर्मस्य दायित्वमिति नाम । पुरुषार्थचतुष्टयप्राप्तौ बहूनि आदर्शवाक्यानि संस्कृतवाङ्मये उपलब्धानि सन्ति । किमर्थं धर्म: ? किमर्थं अर्थ: ? किमर्थं काम: ? किमर्थं मोक्ष: ? इत्यादिषु प्रश्नेषु सत्सु जीवनस्य चरमोद्देश्यं भवति पुरुषार्थचतुष्टयप्राप्ति: इति समादधति ।

अत: बालकानां सुखबोधाय, सम्यग्जीवनयापनाय, समन्वयाय सामञ्जस्याय च मूल्यानि अपेक्षितानि सन्ति । येषामाधारेण समाजे समुदाये राष्ट्रियस्तरे अन्तराष्ट्रियस्तरे च स्वाधिकारोत्तरदायित्वयो: परिपालने ते बालका: समर्था: भविष्यन्ति तेषां सर्वेषां मूल्यानां ज्ञानप्राप्तौ व्यवहारे, प्रदर्शने, दायित्वनिर्वहणे च अध्यापकानां भूमिका सर्वेषु कालेषु सर्वस्तरेषु च अनिवार्या विद्यते । संस्कृतसाहित्येषु नीतिकथासु च मूल्यानि यानि वर्णितानि, अध्यापकानां पाठनेन प्रेरणया च तानि अन्तर्निहितानि भवन्ति। तान्येव मूल्यानि जीवने ग्रहणीयानि संरक्षणीयानि च। तदाधारेणैव जीवनस्य, सामुदायिकजीवनस्य स्वदायित्वस्य च परिपालनं करणीयम्। रघुवंशमहाकाव्ये, रामायणे, महाभारते नर: नारायणो वा सर्वै: मूल्यरक्षणे स्वकर्तव्यदायित्वयो: संरक्षणार्थं विविधानि दायित्वपूर्णकार्याणि अनुष्ठितानि । तद्यथा राज्ञ: दिलीपस्य गोसेवा, कृष्णार्जुनसम्वाद:, रामकथा, ऋषीणां कथा इत्यादय:। अत: संस्कृतसाहित्ये यानि वाक्यानि मूल्यविषयकानि विराजितानि सन्ति, तेषामाधारेणैव वर्तमान शिक्षायां प्रयोगकर्तुं शक्यते। मूल्यानां ज्ञाने, अपि च जीवने तेषां प्रयोगे एव धर्म: इत्येव शिक्षा स्वीकरणीया । एतदर्थं संस्कृतवाङ्मयमनुसर्तव्यम्। तेनैव भारतीयपरिवेशे भारतीयमूल्यानां जीवने समावेश: भवितुमर्हति इति येनैव अलौकिकसुखस्य प्राप्तिर्भवति। सर्वत्र "सर्वे भवन्तु

सुखिनः......." "वसुधैव कुटुम्बकम्" इति भावनायाः विकासेनैव मानवतायाः संरक्षणेन वैश्विकमूल्यानां संरक्षणं नूनमेव भविष्यति । तत्र अध्यापकाः एव मूल्यविकासे, संरक्षणे, प्रचारे, प्रसारे तत्पराः मार्गदर्शिनः भविष्यन्ति तथैव सम्पूर्णमानवसमाजस्योत्थानं विश्वस्तरे भवितुमर्हतीति ।